National Journal of Hindi & Sanskrit Research

ISSN: 2454-9177
NJHSR 2021; 1(38): 116-120
© 2021 NJHSR
www.sanskritarticle.com

**Laxman Majhi**
Research Scholar ,
P.G. Dept. of Sanskrit ,
Utkal University , Vani Vihar,
Bhubaneswar, Odisha-751004

**Saroj Mahananda**
Research Scholar
P.G. Department of Sanskrit
Utkal University, Bhubaneswar

**Correspondence:**
**Laxman Majhi**
Research Scholar ,
P.G. Dept. of Sanskrit ,
Utkal University , Vani Vihar,
Bhubaneswar, Odisha-751004

# कालिदासानुसारं साम्प्रतिककाले पर्यावरणसुरक्षा

**Laxman Majhi, Saroj Mahananda**

**शोधसार: -**

सम्प्रित संसार: विविधाभि: समस्याभि: समाक्रान्त: अवलोक्यते। तासु समस्यासु पर्यावरणस्य समस्या विकरालसमस्यारूपेणास्ति। दूषितेन प्राकृतिक पर्यावरणेन मानसिकं-शारीरिक-सामाजिकं पर्यावरणमापि प्रभावितं भवति। पर्यावरणस्य सन्तुलेन जीवानां मानवानां च जीवने भवति सन्तुलनम्। पर्यावरणे एव सर्वेषां जीवानां अस्तित्वं सुरक्षर्तिं भवति। समुचित पर्यावरणेषु सृष्टे: रचना भवितुं शक्यते। पृथीव्यां विभिन्नजीवानाम् उत्पत्ति: समुचित पर्यावरणे संजता। सौरपरिवारे पृथिव्यतिरिक्तं अन्यग्रहेषु समुचितेन पर्यावरणस्य विकास: न जात:। तेषु ग्रहेषु वायुजलवनादीनि पर्यावरणस्य तत्त्वानि न समवलोक्यन्ते । अतएव तत्र न कोपि जीव: प्रादुर्भवति। वस्तुतस्तु पर्यावरण तत्त्वानि मानवजीवनस्य अमूल्य रत्नानि सन्ति। पर्यावरणस्य शब्दस्य अर्थ: भवति 'परित: आवृणोति व्याप्नोति वा पर्यावरणम्" अर्थात् अस्मान् परित: वायु-जल-भूमि-वन-पशुपक्षी-खणिजादीनि तथा मानव निर्मितानि मोटरयान-वायुयान-जलयान-अणुपरमाणु-दूरदर्शन-दूरभाष-कम्प्युटरादीनि सर्वाणि पदार्थानि पर्यावरणस्य अन्त: समायान्ति। पर्यावरनस्य तत्त्वानां समुचितरूपेण रक्षणेन प्रयोगेन च पर्यावरणे सन्तुलनस्य स्थापना भवति। सन्तुलनस्य स्थापना सर्वेषां पशुपक्षीनां मानवानां च कृते आवश्यकमस्ति। जनसंख्यायाम् अपि वृद्धिकारणात् प्राद्योगिक-विकासात् च पर्यावरणे स्थल-वायु-जल-ध्वनिप्रदूषणानां समस्या संजाता। एषु पदार्थेषु प्रदूषणस्य कारणात् मानवानाम् अस्तित्वस्य विनाश: भवितुं शक्यते। एषु पदार्थेषु प्रदूषणस्य काणात् बहव: मानवा: रोगग्रस्ता: सम्पूर्णविश्वे दृश्यन्ते। पशुपक्षिना विभिन्न-जाति-प्रजातितिनां विनाश: अपि प्रदूषणस्य कारणात् संजात:। अस्मिन् विश्वे पर्यावरण-प्रदूषणस्य समस्या सर्वासु समस्यासु श्रेष्टा। महाकविना कालिदासेन स्वविरचितसकलग्रन्थेषु पर्यावरणस्य सम्बेदात्मकं हृदयावर्जकं रूपं चित्रितम् । अथ पर्यावरस्य विभिन्ना: समस्याया: तत् निराकरणं विषये महाकविकालिदासस्य दृष्ट्या शोधपत्रेऽस्मिन् विचार: कृत:।

**कूटशब्दा: -**

पर्यावरणम्, कृषिफलम्, प्रदूषणम्, सौरपरिवार:, प्रकृति:, मानवसमाज:, वाडवानल:

**उपक्रम: -**

सर्वे जना: सुखं प्राप्तुम् इच्छन्ति। सुखस्य प्राप्तये मानवा: सृष्टे: आरम्भात् अद्यपयर्न्तं प्रयत्नशीलाअवलोकयन्ते। सुखस्य प्राप्तये पर्यावरणस्य महत्वपूर्णं योगदानमस्ति इति अनुभूयते। भोजनं विना न कोऽपि जीवा: जीवनधारणं कर्तुं न शक्यते। भोजनस्य आवश्यकता सर्वप्रधानाऽस्ति। इत्यत्र न कोऽपि सन्देह:। भोजनप्राप्तिस्थानं पर्यावरणे विद्यते। मानवस्य द्वितीया आवश्यकता जलस्य असति। जलं विना अपि जीवनस्य अस्तित्वस्य कल्पनाकर्तुं न शक्यते । जलं तु पर्यावरणे एव प्राप्यते। मानवस्य तृतीया आवश्यकता वायो: अस्ति। वायुं विना क्षणमेकं अपि जीवनं न भवति। ब्रह्माण्डे यत्र वायु: अस्ति तत्रैव सृष्टि: दृश्यते। शुद्धवायु: अस्माकं कृते आवश्यकतत्वमस्ति। शुद्धवायो: प्राप्ति: अपि पर्यावरणे भवति। मानवस्य अस्तित्वस्यरक्षा आवासे एव भवति । आवासस्य व्यवस्थाऽपि पर्यावरणे सञ्जायते। सर्वेषाम् आवश्यकानां पूर्ति: पर्यावरणेन एव भवति। अत: पर्यावरणस्य महत्त्वं अस्माकं कृते

सर्वाधिकमस्ति।

**अपारे काव्य संसारे कविरेव प्रजापतिः।**

**यथास्मै रोचते विश्वं तथेदं परिवर्त्तते।।**[१]

कविः समाजस्य निर्माता द्रष्टा च अङ्गीक्रियते। श्रुतिः कथयति यत् 'कविर्मनीषी परिभूः स्वयम्भु' समाजस्य निर्माणे समाजे सुव्यवस्थायैकवेः योगदान सर्वाधिकं दृश्यते। कवेः मुख्यकर्त्तव्यम् अस्ति समाजे सुख-शान्त्यानन्दमयवातावरणस्य निर्माणे सहयोग प्रदानम्। कथानाटकगद्यमाध्यमेन शिक्षाप्रदानं कवेः मुख्यकर्त्तव्यं भवति कविना स्वकीयज्ञानेन काव्यानि विरच्य समाजे आदर्शस्थापनाय कार्यं क्रियते। समाजे सर्वे रामवत् आचरणं कुर्वन्तु एतदर्थं प्रयत्नः एव कवेः मुख्यकर्त्तव्यम् अस्ति। कविना आदर्शपात्राणां उपस्थापनं कृत्वा समाजे आदर्शाङ्गीकरणस्य शिक्षा प्रदीयते। काव्यस्य उद्देश्यस्य सम्बन्धे आचार्यमम्मटेन सत्यमेव कथितम् –

**काव्यं यशसेऽर्थकृते व्यवहारविदे शिवेतरक्षतये।**

**सद्यः परनिर्वृतये कान्तासम्मिततयोपदेशयुजे।।**[२]

अर्थात् काव्यस्य उद्देश्यमस्ति कान्तासम्मितोपदेशप्रदानम्। रामवत् आचरणस्य शिक्षाप्रदानं काव्यस्य मुख्यम् उद्देश्यमस्ति। रावणवत् आचरणं न कोऽपि कुर्यात् इति विषयस्य शिक्षा कवेः कर्त्तव्यम्।

कविकुलगुरुकालिदासः सुरभारत्याः सर्वश्रेष्ठः कविरत्नः वर्त्तते। कवेरस्य सर्वाणि आदर्शयुक्तानि अवलोक्यते । कालिदासस्य पात्रेषु आदर्शगुणाः पौनः पुण्येन दरीदृश्यते। तत्र राजादिलीपसदृशः पात्रोऽस्ति। असौ पात्रः आदर्शस्य मूर्त्तिः समवलोक्यते। रामसदृशः पात्रः पुरुषोत्तमः अस्ति। कुमारसम्भस्य नायकः देवाधिदेवमहादेवः अस्ति। कालिदासस्य नायिका अपि त्यागस्य मूर्त्तयः अवलोक्यन्ते । कविकुलगुरुकालिदासः पर्यावरणस्य शिक्षा स्वकीयासु रचनासु स्वकीयपात्राणां माध्यमेन प्रस्तौति।

रघुवंशस्य नायकः प्रकृत्याः परमरक्षकः दृश्यते। वनेषू सः गोसेवाकार्ये दृश्यते। गोसेवया पर्यावरणस्य रक्षा भवति। असौ राजा सिंहस्य कृते
स्वकीयं शरीरं भोजनपदार्थवत् प्रस्तुतवान् । यथा –

**तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्ठम्भविमुक्तबाहुः।**

**सन्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिण्डमिवामिषस्य।।**[३]

वृक्षाणां रक्षा पर्यावरणस्य कृते आवश्यकमस्ति। देवदारु वृक्षस्य रक्षायां सिंहः आसीत् इति वर्णन रघुवंशे दृश्यते। यथा –

**भवानपीदं परवानवैति महान्हि यत्नस्त वदेवदारौ।**

**स्थातुं नियोक्तुर्नहि शक्यमग्रेविनाश्य रक्ष्यं स्वयमक्षतेन।।**[४]

अभिज्ञानशाकुन्तले पर्यावरणस्य शिक्षा सर्वत्र दृश्यते। शकुन्तला वृक्षस्य सीञ्चनं स्वयंकरोति वृक्षं प्रति तस्याः स्नेहः कीदृशः आसीत् इति विषयस्य वर्णनम् अवलोक्यताम् तावत्। यथा –

**पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या**

**नादत्ते प्रियमण्डनाऽपि भवतां स्नेहेन या पल्लवम्**

**आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः**

**सेयंयाति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम्।।**[५]

कुमारसंम्भवस्य नायिका पार्वती अपि वृक्षाणां सीञ्चनं स्वयं करोति। यथा –

**अतन्द्रिता सा स्वयमेववृक्षकान् घटस्तनप्रस्रवणैर्व्यवर्धयत्।**

**गुहोपि येषां प्रथमाप्तजन्मानां न पुत्रवात्सल्यमपाकरिष्यति।।**[६]

अनेन ज्ञायते यत् कालिदासेन सर्वेषां कृते इयं शिक्षा प्रदीयते यत् वृक्षाणां सीञ्चनं वृक्षाणां रक्षणम् आवश्यकम् अस्तीति, वृक्षाणां च्छेदनेन पशुनामभिन्धनेन च नरकसय प्राप्तिः भवति इति पञ्चतन्त्रे प्रतिपादितम्।

मत्स्यपुराणे तु एकः वृक्षो दशपुत्रसदृशो मन्यते। यथा-

**दशकूपसमा वापी दशवापी समोद्रुमः**

**दशद्रुमसमः पुत्रः दशपुत्रसमो द्रुमः।।**[७]

वृक्षेषु मानवानाम् इव भावना भवति । इति विषयस्य शिक्षाऽपि कविकुलगुरुकालिदासेन अभिज्ञानशाकुन्तले दत्ता। यथा-

**उर्लितदर्भकवलमृगाः परित्यक्तनर्तना मयूरा।**

**अपसृतपाण्डुपगा मुञ्चन्त्यश्रूणीव लताः।।**[८]

अर्थात् शकुन्तलायाः पतिगृह गमनकाले वृक्षाः अपि रोदन्ति। पर्यावरणस्य निर्माणे पशुपक्षीणां महत्वपूर्णयोगदानमस्ति। पक्षीणां कृते भोजनप्रदानस्य शिक्षा स्वकीयासु रचनाषु दत्ता। तत्र
कुमारसंम्भवस्य नायिका पार्वती स्वयं भोजनं ददाति। यथा-

**अरण्यवीजाञ्जलिदान लालितास्तथा च तस्यां हरिणा विशश्वसुः।।**

**यथा तदीयैर्नयनैः कुतूहात्पुरः सखीनाभिभीतलोचने।।**[९]

पशोः हत्या पर्यावरणस्य कृते उचितं नास्ति। दिलीपस्य माध्यमेन सिंहस्यापि हत्यायाः विरोधः कविकुलगुरुणाकालिदासेन प्रस्तुतः। पशूनां रक्षणं पर्यावरण कृते महद् आवश्यकं वर्तते। पर्यावरणे सन्तुलन स्थापनाय पशुनां रक्षा अवश्यमेव करणीया। कालिदासेन प्रतिपादितं यत् राजा दिलीपः सिंहस्य कृते स्वशरीरं अर्पयितुं तत्परः जातः। यथा –

**सत्वं मदीयेन शरीरवृत्तिः देहेन निर्वर्तयितुं प्रसीद।**

**दिनावसानोत्सुकबलवत्सा विसृज्यतां धेनुरीयं महर्षेः।।**[१०]

एवम् अवगम्यते यत् कविकुलगुरुणा कालिदासेन पर्यावरणरक्षायाः शिक्षा अस्माकं कृते सम्यक् रूपेण स्वकीयासु रचनाषु प्रस्तुता। कविकुलगुरुकालिदासः प्रख्यातः पर्यावरणविद आसीत्। तस्य काव्येषु पर्यावरणस्य तत्त्वानि पोनः पुण्येन राजन्ते। पर्यावरणस्य सर्वेषां तत्त्वानां सूक्ष्मात् सूक्ष्मतरं विवेचनं कालिदासेन विहितम् । यथा मेघदूते –

**धूमज्योतिः सलिलमरुतां सन्निपातः क्व मेघः**

**संदेशार्थाः क्व पटुकरणै प्राणिभि प्रापणीयाः।**

**इत्यौत्सुक्यादपरिगयन्गुङ् लाकस्तं ययाच**

**कामार्ता हि प्रकृति कृपणाश्चेतनाचेतनेषु।।**[११]

विक्रमोर्वशीये –

**निषिञ्चन्माधवीं लक्ष्मीं लता कौन्दी च लासयन्।**

**स्नेहदक्षिण्ययोर्योगात्कामीव प्रतिभाति मे।।**[१२]

ऋतुसंहारे सर्वे श्लोकाः प्राकृतिकवर्णैः युक्ताः सन्ति । यथा –

**द्रुमाः सपुष्पाः सलिलं स पद्मं स्त्रियः सकामापवनः सगन्धि।**

**सुखा प्रदोषा दिवसाश्चरम्या सर्वे प्रिये चारुतरं वसन्ते।।**[१३]

एवम् अवगम्यते यत् कविकुलगुरुकालिदास: पर्यावरणस्य महान् ज्ञाता आसीत्। एवम् पर्यावरणम् अस्माकं जीवने महत्त्वपूर्णम् अङ्गम् अस्ति।

**सर्वेषां पर्यावरणत्त्वानां मिथ: सम्बन्ध: -**

पर्यावरणस्य निर्माणे यानि वायु-जल-भूमि-प्राणी-वनाकाशदीनि पदार्थानि सन्ति, तेषां मध्ये मिथ: सम्बन्ध: अवलोक्यते । जलस्य निर्मणे वायो: सहयोग: अस्ति। वायुना वाष्परूपेण समुद्रजलेन आकाशे मेघानां निर्माणं क्रियते ।वृक्षाणा उत्पत्तौ भूमिजल वयुनां सहयोग: अस्ति। पशुपक्षी मानवानां निर्माणे क्षितिजलपावक गगनसमीरादीनां पदार्थानां परस्पर सहयोग: वर्त्तते। वायुना विना कोऽपि जीव: क्षणमात्रमपि जीवितुं न शक्यते वायुं विना वृक्षस्य उत्पत्तिन संजायते। यदि वायुपदार्थे दूषणं भवेत् तर्हि मानवानां पसुपक्षीणां विनाशो भविष्यति। एवं निश्चीयते यत् जल-वायु-पशुपक्षीणां मध्ये मिथ:सम्बन्ध: अस्ति। कविकुलगुरुणा कालिदासेन उक्तमपि, यथा–

**या सृष्टि: स्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री**
**ये द्वेकालं विधत: श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।**
**यामाहु: सर्वबीजप्रकृतिरिति यया प्राणीन: प्राणवन्त:**
**प्रत्यक्षाभि: प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीश:।।**[१४]

अर्थात् जल-अग्नि-होता-सूर्य-चन्द्र-आकाश-पृथिवी-वायुनां अष्टप्रत्यक्षरूपेषु भगवान् शिव: अस्ति। अर्थात् एतेषां तत्त्वानां मिश्रणं भगवान् शिव: अस्ति। मेघस्य निर्माणं कथं भवति इति सम्बन्धे मेघदूतगीतिकाव्ये कविना सत्यमेव उक्तम् यथा –

**धूमज्योति: सलिलमरुतां सनिपात: क्व मेघ:**
**सन्देशार्था: क्व पटुकरणै प्राणिभि प्रापणिया:।**
**इत्यौत्सुक्यादपरिगणयन् गुह्यकस्तं ययाचे**
**कामार्त्ता हि प्रकृतिकृपणा श्चेतनाचेतनेषु।।**[१५]

अर्थात् मेघानां निर्माणं धूमज्योतिसलिलमरुतां सनिपातेन भवति। अर्थात् तेषां पदार्थानां परस्पर सहयोगेन मेघानां निर्माणं भवति। अर्थात् तेषां पदार्थानां परस्परसहयोगेन मेघानां निर्माणं भवति मेघस्य कार्येऽपि वायो: महत्त्वपूर्णम् योगदानमस्ति। तथैव कविकुलगुरुणा उक्तम्। यथा -

**मन्दं मन्दं नुदति पवनश्चानुकूलो यथा त्वा**
**वामश्चायं नदति मयुरं चातकस्ते सगन्ध:।**
**गर्भाधानक्षणपरिचया नयनसुभगं खे भवन्तं बलाका:।।**[१६]

अर्थात् अनुकूल पवनेन मेघ: कार्यम् कर्त्तुं प्रभवति। जलस्य प्रभावेण भूम्याम् उर्वराशक्ति: आयाति। भूम्यां जलस्य समुचित मात्राया आवश्यकता भवति यदा प्रथमा वृष्टि: संजायते तदा भूम्यां कथं स्थिति: भवति इति विषयस्य वर्णनं कविकुलगुरुणा अधोलिखित प्रकारेण पूर्व मेघदूते कृतम्। यथा –

**त्वय्यासक्तं कृषिफलमिति भ्रूविलासानभिज्ञै:**
**प्रीतिस्निग्धैर्जनपदवधूलोचनै: पीयमान:।**
**सद्य: सीरोत्कषणसुरभिक्षेत्रमारुह्य मालं**
**किञ्चित्पश्चद्व्रजलधुगतिर्भूय एवोत्तरेण।।**[१७]

अत्र कविना स्पष्टीकृतं यत् कृषिफल वर्षाया: अधीनं भवति। वर्षया वनस्य रक्षाऽपि भवति। वने वड़वानलस्य शान्त्यर्थं वर्षाया: एव जलम् उपयुक्तं भवति।

वायुं विना जलस्य निर्माणं न भवति जलस्य प्रभाव: पवनेषु दृश्यते। यथा समुद्रतटस्य क्षेत्रेषु न कदापि तापमाने विषमता दृस्यते यत् स्थानं तटात् दूरे अस्तु तत्र स्थाने वायुतापान्तरम् अधिकं दृश्यते। तापमानस्य निर्माणे जलस्य योगदानं स्वीक्रियते। वृक्षवनस्पतिवनानां सहयोग: अपि तापमानस्य निर्माणे, भूम्यां उर्वरशक्तिप्राप्तये वर्षायाश्च कृते दृश्यते।

एवं निश्चीयते यत् सर्वेषां पर्यावरणतत्त्वानां मिथ: सम्बन्ध: अस्ति। एकं विना द्वितीयस्य अस्तित्वं नास्ति।

**वर्त्तमान-परिप्रेक्षे पर्यावरणतत्त्वानां स्थिति: -**

सम्प्रति सम्पूर्णोविश्वेस्मिन् पर्यावरनस्य स्थिति: चिन्तनीया अस्ति। अस्माकं पर्यावरणे सर्वत्र विभिन्ना: दोषा: अवलोक्यन्ते। पर्यावरणस्य दोषे सति मानवानां स्थिति: दयनीया दृश्यते। मानवेषु विभिन्नरोगा: दृश्यन्ते। अधिकांशजना: विभिन्नरोगै: ग्रस्ता: अवलोक्यन्ते। समाजे जलप्रदूषणस्य समस्या, स्थलप्रदूषणस्य समस्या, ध्वनिप्रदूषणस्य समस्या अवलोक्यन्ते। वर्त्तमान परिप्रेक्ष्ये एतेषां प्रदूषणानां किं कारणम् इति विषयस्य विवेचनम् आवश्यकमस्ति। वर्त्तमान समये पर्यावरणतत्त्वानां का स्थिति: इति विवेचनीया।

सम्प्रति पर्यावरणे जलप्रदूषणस्य समस्या सर्वाधिका दृश्यते भारतीयस्वास्थ्यमन्त्रालयस्य वार्षिक प्रतिवेदने कथितम् यत् विकासशीलदेशेषु प्रतिवर्षं २.५०कोटीजना: जलप्रदूषणस्य कारणेन रोगग्रस्ता: सन्ति।

भारते नद्या: जलं प्रदूषितं दृश्यते। वारणास्यां गङ्गाया: जलम् अति प्रदुष्टम् अस्ति। सर्वकारेण 'गङ्गा सफाइ कार्य योजना' प्रवर्त्तिता। ओद्योगिककारणात् विकसितदेशेषु विकासशीलदेशेषु चजलप्रदूषणस्य समस्या उत्पन्ना । प्रतिदिनं बृहत् ओद्योगिक केन्द्रात् अस्वच्छजलेन सह दूषितं पदार्थं नगरस्थितनदीषु प्रक्षिप्यन्ते । अनेन नद्या: जलेषु हानीकारक तत्त्वानां वृद्धि: संजायते। अनेन जलपानेन मानवा: विभिन्नरोगग्रस्ता: जायन्ते। एवं पञ्चत्वं प्राप्नुवन्ति जीवा: मानवाश्च। जलप्रदूषणेन जलजीवानां वनजीवानामपि अस्तित्वस्य समाप्ति: भविष्यति। जलप्रदूषणस्य समस्याया: कारणं मानवेषु अशिक्षा अस्ति। सम्प्रतिं विश्वस्मिन् समुचितशिक्षया अभाव: वर्त्तते। शिक्षाया: प्रचारेण प्रसारेण च जलप्रदूषणस्य समस्याया: समाधानं भवितुम् शक्यते।

सम्प्रति: विश्वे वायुप्रदूषणस्य समस्याऽपि विकरालरूपेण दृश्यते। जनसंख्याया वृद्धित्वात् वनानां विनाशत्वात् औद्योगिककारणत्वात् च प्रतिदिनं वायुप्रदूषणे वृद्धित्वं भवति।

थैलचालित: यानानां वृद्धिकारणात् अपि वायुप्रदूषणस्य समस्या दृश्यते। अनेन वायुप्रदूषणं संजायते। वायुप्रदूषणत्वादपि प्रकृत्या:

विनाशो भवितुं शक्यते।

सम्प्रति: विश्वे ध्वनिप्रदूषणस्य समस्याऽपि लोचनपथमायाति। अनेन मानवानां मानसिकस्थिति सोचनीया जायते। वैज्ञानिकसर्वेक्षणानुसारेण ध्वनिप्रदूषणस्य कारणात् ६६ज्ञ् जना: तेषु विकसित नगरेषु तनावग्रस्ता: अवलोक्यन्ते।

अनेन विवेचनेन अवगम्यते यत् अस्मिन् विश्वे पर्यावरणस्य स्थिति: अत्यन्तशोचनीया दृश्यते प्रतिदिनं पर्यावरणस्य स्थित्यां विकरालता एव दृश्यते।

**वर्त्तमानयुगे पर्यावरण प्रदूषणस्य समस्या –**

वर्त्तमानयुगे पर्यावरण प्रदूषणस्य महती समस्या अवलोक्यन्ते। जनसंख्याम् अत्यधिकवृद्धित्वात् इयं समस्या विकरालरूपा जाता। औद्यगिक कारणात् अपि वर्त्तमानयुगे पर्यावरण प्रदूषणस्य समस्या उत्पन्ना। उपभोक्तावादी संस्कृत्या: प्रचलनत्वात् विश्वे वर्त्तमानयुगे पर्यावरणे वृद्धि: संजायते। समाजे धार्मिकभावनाया: अभवत्वात् समस्येयम् उत्पन्ना मानवानां कृते वृक्षाणां सर्वाधिक महत्त्वं मन्यते। वृक्षाणां महत्त्वं प्राचीनकालात् दृश्यते । वनानां च्छेदनेन वायुमण्डले प्रदूषणस्य समस्या दृश्यते। इदानीं वनानां अभावात् भुम्यां रक्षणम् अस्य विश्वस्य महती समस्या दृश्यते । वनानां विनाशात् मालभूमि प्रदेशस्य वृद्धि: भवति। इयमपि समस्या सम्प्रति सम्पूर्ण विश्वे लोचनपथमायाति वनात् वर्षा अपि जायते। वनानां अभावात् वर्षायामपि न्यूनता प्रतिवर्षं सम्पूर्णविश्वे अवलोक्यते।

स्थलप्रदूषणस्य समस्याऽपि वर्त्तमानयुगे पर्यावरणप्रदूषणस्य महती समस्या विद्यते। स्थलानां उर्वरतायै स्थलेषु वृक्षा: आवश्यका: सन्ति। सम्प्रति भूम्यां वृक्षाणाम् अभाव दृश्यते।

औद्योगिक विकासत्वात् अपि स्थलप्रदूषणे वृद्धि: संजायते। पशुपक्षीणां विनाश: अपि स्थलप्रदूषणात् संजायते। प्लाष्टिक् इति पदार्थस्य वृद्धित्वात् पर्यावरणे प्रदूषणसमस्या उत्पन्ना।

अणुपरमाणु विद्युतादीनां पदार्थादीनां प्रचलनात् समाजे वर्त्तमानयुगे पर्यावरणप्रदूषणस्य समस्या उत्पन्ना।

अस्मिन् विश्वे आतङ्कवादस्य महती समस्या लोचनपथमायाति। आतङ्कवाद कारणात् अपि पर्यावरणे प्रदूषणो वृद्धि: संजायते। पर्यावरणस्य समस्यां प्रति पूर्णरूपेण चेतनाया: अभाव: इदानीं सम्पूर्णविश्वे दृश्यते। विभिन्न औषधानां, यन्त्रानां, वायुयानानां, आयुधानां, प्रचलनम् इदानीं सम्पूर्णविश्वे दृश्यते। एतेषां प्रचलनात् सम्पूर्ण विश्वे इदानीं पर्यावरणप्रदूषण समस्याया: वृद्धि: संजायते। सम्पूर्णविश्वे मानवानां मध्ये शिक्षाया: अभाव: अपि दृश्यते। मानवानां कृते शिक्षाया महत्त्वं सर्वाधिकमस्ति । यदि शिक्षाया: प्रयोग: सम्पूर्णविश्वे सम्यक् रूपेण भवेत् तर्हि पर्यावरणस्य समस्या समाप्ता भविष्यति।

**कालिदास दृष्ट्या पर्यावरणप्रदूषण समस्याया: निराकरणम् –**

कविकुलगुरुकालिदास: पर्यावरणस्य महान् ज्ञाता आसीत्। अयं जानाति स्म यत् समाजे समुचितसम्यक पर्यावरणस्य महती आवश्यकता भवति। समुचित पर्यावरणम् न स्यात् तर्हि विश्वस्य समाप्ति: निश्चितरूपेण भविष्यति। विश्वस्य रक्षणाय पर्यावरणे सौम्यता स्थापनाय पर्यावरणे अनुकूलताया: अपेक्षा भवति। कविना कालिदासेन पर्यावरणस्य तत्त्वानां महत्व प्रतिपादनं सम्यक् रूपेण स्वकीयासु रचनासु विहितम्। कालिदासदृष्ट्या पर्यावरणप्रदूषण समस्याया: निराकरणम् आवश्यकं भवति। एतदर्थं पर्यावरणतत्वानां रक्षणम् आवश्यकं भवति। पर्यावरणस्य तत्त्वानि वायु-जल-भूमि-वृक्ष-पशु-पक्षी-मानवादय: सन्ति। तेषां मध्ये परस्परं सहयोगत्वात् पर्यावरणे प्रदूषणसमस्यया: निराकरणं भविष्यति। पर्यावरणस्य निर्माणे वनपादपानां नाम सर्वाधिकं महत्त्वं भवति। कालिदासेन स्वकीयासु रचनासु वनवृक्षाणां महत्त्वं प्रतिपादितम्। वृक्षाणां सीञ्चनं कुमारसम्भवस्य नायिका स्वयं करोति। अभिज्ञानशाकुन्तलस्य नायिकाऽपि वृक्षाणां सीञ्चनं रक्षणं च स्वयं करोति। रघुवंशेऽपि वृक्षाणां रक्षणस्य वर्णनं कविकुलगुरुकालिदासेन वर्णितम् । यथा-

**अमुं पुर:पश्यसि देवदारुं पुत्रीकृतोऽसौ वृषमध्वजेन।**
**यो होमकुम्भस्तननि: सृतानां सकन्दस्य मातु: पयतां रसज्ञ:।।**[१८]

अर्थात् तस्मिन् समये भगवान् शङ्कर: देवदारुवृक्षं स्वपुत्रवत् स्नेहं करोति स्म। पार्वती अपि मातावत् वृक्षस्य रक्षणं करोति स्म । अनेन श्लोकेन कालिदास: पर्यावरणे प्रदूषणसमस्याया: निराकरणाय वृक्षाणां रक्षणं प्रतिपादितवान्। पर्यावरणस्य निर्माणे पशुपक्षीनामपि महत्त्वपूर्णयोगदानमस्ति। पशुपक्षीनां रक्षायै पर्यावरणे प्रदूषणसमस्याया: निराकरणम् आवश्यकमस्ति। वनेषु पशूनां हत्या न भवेत् सुरक्षितवनप्रदेशा भवेयु:। वनेषु मृगया कार्यं न भवेत् इति विषयस्य शिक्षाऽपि कालिदासेन अभिज्ञानशाकुन्तले दत्तम्। यथा-

**न खलु न खलु बाण: सन्निपात्योऽयमस्मिन्**
**मृदुनि मृगशरीरे तुलाराशाविषाग्नि।**
**क्व तव हरिणकानां जीवितञ्चातिलोलं**
**क्व च निशितनिपाता वज्रासरा: शरास्ते।।**

अपि च

**तत्साधुकृतसन्धनं प्रतिसंहर सायकम् ।**
**आर्त्तत्राणाय व: शस्त्रं न प्रहर्तुमनागसि।।**[१९]

अस्मिन् श्लोके कविकुलगुरुणा प्रतिपादितं यत् पशूनां हत्या न स्यात्। राजादिलीपेन पशूनां भोजनस्य कृते स्वयं शरीरम् अर्पितम्। यथा –

**तथेति गामुक्तवते दिलीप: सद्य: प्रतिष्टम्भविमुक्तबाहु:।**
**सन्यस्तशस्त्रो हरये स्वदेह मुपानयात्पिण्डमिवामिषस्य।।**[२०]

आदिकविना वाल्मीकिना अपि पशुहत्याया: विरोध: कृत:। यथा-

**मा निषाद प्रतिष्ठां त्वमगम: शाश्वती समा:।**
**यत् क्रौञ्चमिथुनादेकमवधी: काममोहितम्।।**[२१]

अर्थात् हे निषाद! त्वं नित्यां निरन्तरां शान्ति न लभे। यत्त्वं क्रौञ्चमिथुनात् एकं काममोहितम् अवधी:।

जलानं अपि पर्यावरणस्य निर्माणे महत्त्वपूर्णं योगदानमस्ति। जलस्य महत्त्वस्य ज्ञानेन पर्यावरणे जलप्रदूषणस्य समस्याया: निराकरणं भविष्यति। जलानां महत्त्वस्य प्रतिपादनं कविकुलगुरुणा कालिदासेन अधोलिखित प्रकारेण विहितम् । यथा –

**या सृष्टि: स्त्रष्टुराद्या वहति विधिहुतं या हविर्या च होत्री**
**ये द्वेकालं विधत: श्रुतिविषयगुणा या स्थिता व्याप्य विश्वम्।**

**यामाहु: सर्वबीजप्रकृतिरिति यया प्राणीन: प्राणवन्त:**
**प्रत्यक्षाभि: प्रपन्नस्तनुभिरवतु वस्ताभिरष्टाभिरीश:॥**[२२]

अर्थात् जलम् एव ब्रह्मण: आदिसृष्टि:। जल-अग्नि-होता-सूर्य-पृथ्वी-वाय्वादीनि अष्टपदार्थानि प्रत्यक्षरूपे देवाधिदेव महादेव: शिवरूपेण दृश्यते। एतेषां तत्त्वानां सम्यक् रूपेण पूजनेन अर्थात् रक्षणेन देवाधिदेव महादेव: प्रसन्नो भविष्यति। देवाधिदेवस्य महादेवस्य प्रसन्नत्वात् मानवा: स्वर्गस्य प्राप्तिं करिष्यन्ति । अर्थात् भविष्ये आनन्दस्य अनुभवाय वायु-जल-भूमि-आकाशादीनां पर्यावरण तत्त्वानां रक्षणम् आवश्यकमस्ति। एतेषां रक्षणेन पर्यावरणे प्रदूषणस्य समस्याया: निराकरणं निश्चितरूपेण भविष्यति।

**उपसंहार: -**

पर्यावरणस्य सम्बन्धे विचार: मुख्यरूपेण अयमस्ति यत् पर्यावरणस्य तत्त्वानां रक्षणं सम्यक् रूपेण भवेत्। पर्यावरणस्य मुख्यतत्त्वानि स्थलजलवायुपसुपक्षीमानवादय: सन्ति। तेषां मध्ये कीदृश: धार्मिकभावनायां वनानां च्छेदनानेन समाप्ति: भविष्यति। यदि सर्वे जानन्ति यत् वृक्षाणां रक्षणेन स्वर्गस्य प्राप्ति: भवति,तदा समाजे पर्यावरणस्य समस्या न भविष्यति। भौतिकतावादी उपभोक्तावादी संस्कृत्या: त्याग: अपि पर्यावरणस्य रक्षायै आवश्यक: अस्ति।

पर्यावरणस्य अन्या अपि अनेका: समस्या: सन्ति। यासां समाधानं यदि न क्रीयते चेत् सम्पूर्णा इयं धरा विलुप्ता भवितुं शक्नोति । वायु:-अन्नं-जलं सर्वं विलुप्तं स्यात्। प्रकृते: प्रकोप प्रभावात् जिवा: विलुप्ता भवेयु: अत: अस्य समाधानाय वेदे वहुविधा: उपाया: प्रदत्ता: सन्ति। वैदिकऋषय: पर्यावरणाय शुद्धरूपं प्रदातुं प्रयतमाना: आसन्। ते सूर्यम्, आग्निं, वायुं , वृक्षान् अपि देवता मत्वा तेषां महत्त्वस्य वारवारं विस्तरेण गानं कृतवन्त:। अस्मान् पर्यावरणस्य महत्त्वस्योपरि ध्यानं अप्राचीनकालादेव प्ररयन्ति। वेदेषु प्राकृतिकोर्जेया: अक्षयराशे: स्तुति: अवलोक्यन्ते। प्राय: अथर्ववेदे एतादृकस्तुतीनाम् एका विशालनिधि: अस्ति।

संस्कृतवाङ्मये बहव: कवय: राजन्ते। तेषु कविकुलगुरुकालिदास: सर्वश्रेष्ठ: कविरत्न: वर्तते। यथा पुष्पेषु कमलस्य ऋतुनां वसन्तस्य पर्वतेषु हिमालयस्य च स्थानमस्ति तथैव संस्कृतकविषु कविकुलगुरुकालिदासस्य। संस्कृत मर्मज्ञानाम् अनुसारेण संस्कृतसाहित्यर्कामिन्या विलास: कविकुलगुरुकालिदास:। कालिदास: न केवलं कवित्वप्रतिभासम्पन्नो महाकवि: अपितु महान् पर्यावरणतत्त्व विश्लेषक:। तस्य काव्यन्म् अध्ययनेन अनुशीलनेन च ज्ञायते यत् अयं कवि: महान् पर्यावरणविद् वर्त्तते। कविकुलगुरुकालिदासेन स्वकाव्यग्रन्थेषु वृक्ष-पुष्प-जल-पर्वतादीनां पर्यावरणस्य तत्त्वानाम् अति मनमोहकं वर्णनम् उपस्थापितमस्ति। एतत् सर्वं कालिदासकृतं वर्णनमिदमेव तथ्यं स्थापयति यत् महाकविना कालिदासेन स्वविरचित सकलग्रन्थेषु पर्यावरणस्य संबेदान्तकं हृदयावर्जकञ्च रूपं चित्रितम्। वैदिक मन्त्रेषु अपि पर्यावरणस्य शुद्धताया: कृते शान्तिमन्त्रा: वर्णिता: सन्ति। यथा-

**ॐ द्यौ: शान्ति:, अन्तरिक्षं शान्ति:,पृथिवी शान्ति:।**
**आप: शान्ति:, औषधय: शान्ति, वनस्पतय:शान्ति:,**
**विश्वेदेवा: शान्ति: सर्वं शान्ति:, शान्तिरेव शान्ति:,**
**सा मा शान्तिरेधि।**

**सहायकग्रन्थसूची-**

१. अग्निहोत्री डा. प्रभुदयाल, महाकविकालिदास, इष्टर्न वुक् लिङ्कर्स दिल्ली -७, १९९७
२. चन्द्रकाले गोरेश्वर राम, विक्रमोर्ज्वशीयम्, मोतिलाल् वनारसी दास्, दिल्ली -७, १९७५
३. द्विवेदी आचार्य पं. श्रीशिवप्रसाद, अभिज्ञान शाकुन्तलम्, भारतीय विद्याप्रकाशन, दिल्ली
४. पाण्डुरंङ्ग काशीनाथ, रघुवंशमहाकाव्यम्, तुकारम, वावाजी दादाजी निर्माण सागर प्रेस्, मुम्बइ, १८९८
५. पाढी डा. प्रोमोद कुमार, मेघदूतम्, किताब महल, कटक, किताब महल २००९
६. भारद्वाज डा. शि. प्रकाश, कालिदास दर्शन, अशोक प्रकाशन, नियु दिल्ली -६, १९७५
७. मिश्र डा. ब्रजसुन्दर, मेघदूतम्, विद्यापुरी, कटक, २०१२
८. शतपथि डा. हरेकृष्ण अभिज्ञान शाकुन्तलम्, किताब महल, कटक , २०१०
९. शास्त्री जगदीश लाल् कुमारसंम्भवम्, मोतिलाल् वनारसी, दील्ली -७ , १९७५
१०. Devadhar C.R, Work of Kalidas, Motilal Banarasi- das, १९९७
११. Gopal Ram, Kalidas His Art and Culture, Concept Publishing Company, New Delhi, १९९९

**टिप्पणी –**

१-अग्निपुराण: ३३१/१०
२-काव्यप्रकाश: १/२
३-रघुवंशम् २/५९
४- रघुवंशम् २/५६
५-अभिज्ञानशाकुन्तलम् ४/९
६-कुमारसम्भवम् ५/१४
७-मत्स्यपुराणम् हिमादि. अ. १३
८- अभिज्ञानशाकुन्तलम् ४/१२
९- कुमारसम्भवम् ५/१५
१०- रघुवंशम् २/४५
११- मेघदूतम्,पूर्वमेघ-५
१२-विक्रमोर्वंशीयम् २/५
१३-ऋतुसंहारम् ६/२
१४- अभिज्ञानशाकुन्तलम् १/१
१५- मेघदूतम्,पूर्वमेघ-५
१६- मेघदूतम्,पूर्वमेघ-१०
१७- मेघदूतम्,पूर्वमेघ-१६
१८- रघुवंशम् २/३६
१९- अभिज्ञानशाकुन्तलम् १/१०,११
२०- रघुवंशम् २/५९
२१-वाल्मीकिरामायणम् १/१
२२-अथर्ववेद: ८.१.२६